# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ४८

स प्रविश्य पुरीं लङ्कां रामबाणभयार्दितः ।
भग्नदर्पस्तदा राजा बभूव व्यथितेन्द्रियः ॥ १॥

मातङ्ग इव सिंहेन गरुडेनेव पन्नगः ।
अभिभूतोऽभवद्राजा राघवेण महात्मना ॥ २॥

ब्रह्मदण्डप्रकाशानां विद्युत्सदृशवर्चसाम् ।
स्मरन्राघवबाणानां विव्यथे राक्षसेश्वरः ॥ ३॥

स काञ्चनमयं दिव्यमाश्रित्य परमासनम् ।
विक्प्रेक्षमाणो रक्षांसि रावणो वाक्यमब्रवीत् ॥ ४॥

सर्वं तत्खलु मे मोघं यत्तप्तं परमं तपः ।
यत्समानो महेन्द्रेण मानुषेणास्मि निर्जितः ॥ ५॥

इदं तद्ब्रह्मणो घोरं वाक्यं माम् अभ्युपस्थितम् ।
मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा ॥ ६॥

देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः ।
अवध्यत्वं मया प्राप्तं मानुषेभ्यो न याचितम् ॥ ७॥

एतदेवाभ्युपागम्य यत्नं कर्तुमिहार्हथ ।
राक्षसाश्चापि तिष्ठन्तु चर्यागोपुरमूर्धसु ॥ ८॥

स चाप्रतिमगम्भीरो देवदानवदर्पहा ।
ब्रह्मशापाभिभूतस्तु कुम्भकर्णो विबोध्यताम् ॥ ९॥

स पराजितमात्मानं प्रहस्तं च निषूदितम् ।
ज्ञात्वा रक्षोबलं भीममादिदेश महाबलः ॥ १०॥

द्वारेषु यत्नः क्रियतां प्राकाराश्चाधिरुह्यताम् ।
निद्रावशसमाविष्टः कुम्भकर्णो विबोध्यताम् ॥ ११॥

नव षट्सप्त चाष्टौ च मासान्स्वपिति राक्षसः ।
तं तु बोधयत क्षिप्रं कुम्भकर्णं महाबलम् ॥ १२॥

स हि सङ्ख्ये महाबाहुः ककुदं सर्वरक्षसाम् ।
वानरान्राजपुत्रौ च क्षिप्रमेव वधिष्यति ॥ १३॥

कुम्भकर्णः सदा शेते मूढो ग्राम्यसुखे रतः ।
रामेणाभिनिरस्तस्य सङ्ग्रामोऽस्मिन्सुदारुणे ॥ १४॥

भविष्यति न मे शोकः कुम्भकर्णे विबोधिते ।
किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि ॥ १५॥

ईदृशे व्यसने प्राप्ते यो न साह्याय कल्पते ।
ते तु तद्वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः ॥ १६॥

जग्मुः परमसम्भ्रान्ताः कुम्भकर्णनिवेशनम् ।
ते रावणसमादिष्टा मांसशोणितभोजनाः ॥ १७॥

गन्धमाल्यांस्तथा भक्ष्यानादाय सहसा ययुः ।
तां प्रविश्य महाद्वारां सर्वतो योजनायताम् ॥ १८॥

कुम्भकर्णगुहां रम्यां सर्वगन्धप्रवाहिनीम् ।
प्रतिष्ठमानाः कृच्छ्रेण यत्नात्प्रविविशुर्गुहाम् ॥ १९॥

तां प्रविश्य गुहां रम्यां शुभां काञ्चनकुट्टिमाम् ।
ददृशुर्नैरृतव्याघ्रं शयानं भीमदर्शनम् ॥ २०॥

ते तु तं विकृतं सुप्तं विकीर्णमिव पर्वतम् ।
कुम्भकर्णं महानिद्रं सहिताः प्रत्यबोधयन् ॥ २१॥

ऊर्ध्वरोमाञ्चिततनुं श्वसन्तमिव पन्नगम् ।
त्रासयन्तं महाश्वासैः शयानं भीमदर्शनम् ॥ २२॥

भीमनासापुटं तं तु पातालविपुलाननम् ।
ददृशुर्नैरृतव्याघ्रं कुम्भकर्णं महाबलम् ॥ २३॥

ततश्चक्रुर्महात्मानः कुम्भकर्णाग्रतस्तदा ।
मांसानां मेरुसङ्काशं राशिं परमतर्पणम् ॥ २४॥

मृगाणां महिषाणां च वराहाणां च सञ्चयान् ।
चक्रुर्नैरृतशार्दूला राशिमन्नस्य चाद्भुतम् ॥ २५॥

ततः शोणितकुम्भांश्च मद्यानि विविधानि च ।

पुरस्तात्कुम्भकर्णस्य चक्रुस्त्रिदशशत्रवः ॥ २६॥

लिलिपुश्च परार्ध्येन चन्दनेन परन्तपम् ।
दिव्यैराच्छादयामासुर्माल्यैर्गन्धैः सुगन्धिभिः ॥ २७॥

धूपं सुगन्धं ससृजुस्तुष्टुवुश्च परन्तपम् ।
जलदा इव चोनेदुर्यातुधानाः सहस्रशः ॥ २८॥

शङ्खानापूरयामासुः शशाङ्कसदृशप्रभान् ।
तुमुलं युगपच्चापि विनेदुश्चाप्यमर्षिताः ॥ २९॥

नेदुरास्फोटयामासुश्चिक्षिपुस्ते निशाचराः ।
कुम्भकर्णविबोधार्थं चक्रुस्ते विपुलं स्वनम् ॥ ३०॥

सशङ्खभेरीपटहप्रणादम्
आस्फोटितक्ष्वेडितसिंहनादम् ।
दिशो द्रवन्तस्त्रिदिवं किरन्तः
श्रुत्वा विहङ्गाः सहसा निपेतुः ॥ ३१॥

यदा भृशं तैर्निनदैर्महात्मा
न कुम्भकर्णो बुबुधे प्रसुप्तः ।
ततो मुसुण्डीमुसलानि सर्वे
रक्षोगणास्ते जगृहुर्गदाश् च ॥ ३२॥

तं शैलशृङ्गैर्मुसलैर्गदाभिर्
वृक्षैस्तलैर्मुद्गरमुष्टिभिश् च ।
सुखप्रसुप्तं भुवि कुम्भकर्णं
रक्षांस्युदग्राणि तदा निजघ्नुः ॥ ३३॥

तस्य निश्वासवातेन कुम्भकर्णस्य रक्षसः ।
राक्षसा बलवन्तोऽपि स्थातुं नाशक्नुवन्पुरः ॥ ३४॥

ततोऽस्य पुरतो गाढं राक्षसा भीमविक्रमाः ।
मृदङ्गपणवान्भेरीः शङ्खकुम्भगणांस्तथा ।
दशराक्षससाहस्रं युगपत्पर्यवादयन् ॥ ३५॥

नीलाञ्जनचयाकारं ते तु तं प्रत्यबोधयन् ।
अभिघ्नन्तो नदन्तश्च नैव संविविदे तु सः ॥ ३६॥

यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा ।
ततो गुरुतरं यत्नं दारुणं समुपाक्रमन् ॥ ३७॥

अश्वानुष्ट्रान्खरान्नागाञ्जघ्नुर्दण्डकशाङ्कुशैः ।
भेरीशङ्खमृदङ्गांश्च सर्वप्राणैरवादयन् ॥ ३८॥

निजघ्नुश्चास्य गात्राणि महाकाष्ठकटं करैः ।
मुद्गरैर्मुसलैश्चैव सर्वप्राणसमुद्यतैः ॥ ३९॥

तेन शब्देन महता लङ्का समभिपूरिता ।
सपर्वतवना सर्वा सोऽपि नैव प्रबुध्यते ॥ ४०॥

ततः सहस्रं भेरीणां युगपत्समहन्यत ।
मृष्टकाञ्चनकोणानामसक्तानां समन्ततः ॥ ४१॥

एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यत ।
शापस्य वशमापन्नस्ततः क्रुद्धा निशाचराः ॥ ४२॥

महाक्रोधसमाविष्टाः सर्वे भीमपराक्रमाः ।
तद्रक्षोबोधयिष्यन्तश्चक्रुरन्ये पराक्रमम् ॥ ४३॥

अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम् ।
केशानन्ये प्रलुलुपुः कर्णावन्ये दशन्ति च ।
न कुम्भकर्णः पस्पन्दे महानिद्रावशं गतः ॥ ४४॥

अन्ये च बलिनस्तस्य कूटमुद्गरपाणयः ।
मूर्ध्नि वक्षसि गात्रेषु पातयन्कूटमुद्गरान् ॥ ४५॥

रज्जुबन्धनबद्धाभिः शतघ्नीभिश्च सर्वतः ।
वध्यमानो महाकायो न प्राबुध्यत राक्षसः ॥ ४६॥

वारणानां सहस्रं तु शरीरेऽस्य प्रधावितम् ।
कुम्भकर्णस्ततो बुद्धः स्पर्शं परमबुध्यत ॥ ४७॥

स पात्यमानैर्गिरिशृङ्गवृक्षैर्
अचिन्तयंस्तान्विपुलान्प्रहारान् ।
निद्राक्षयात्क्षुद्भयपीडितश् च
विजृम्भमाणः सहसोत्पपात ॥ ४८॥

स नागभोगाचलशृङ्गकल्पौ
विक्षिप्य बाहू गिरिशृङ्गसारौ ।
विवृत्य वक्त्रं वडवामुखाभं
निशाचरोऽसौ विकृतं जजृम्भे ॥ ४९॥

तस्य जाजृम्भमाणस्य वक्त्रं पातालसंनिभम् ।
ददृशे मेरुशृङ्गाग्रे दिवाकर इवोदितः ॥ ५०॥

विजृम्भमाणोऽतिबलः प्रतिबुद्धो निशाचरः ।
निश्वासश्चास्य सञ्जज्ञे पर्वतादिव मारुतः ॥ ५१॥

रूपमुत्तिष्ठतस्तस्य कुम्भकर्णस्य तद्बभौ ।
तपान्ते सबलाकस्य मेघस्येव विवर्षतः ॥ ५२॥

तस्य दीप्ताग्निसदृशे विद्युत्सदृशवर्चसी ।
ददृशाते महानेत्रे दीप्ताविव महाग्रहौ ॥ ५३ ॥

आदद्बुभुक्षितो मांसं शोणितं तृषितोऽपिबत् ।
मेदः कुम्भं च मद्यं च पपौ शक्ररिपुस्तदा ॥ ५४ ॥

ततस्तृप्त इति ज्ञात्वा समुत्पेतुर्निशाचराः ।
शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ॥ ५५ ॥

स सर्वान्सान्त्वयामास नैरृतान्नैरृतर्षभः ।
बोधनाद्विस्मितश्चापि राक्षसानिदमब्रवीत् ॥ ५६ ॥

किमर्थमहमाहत्य भवद्भिः प्रतिबोधितः ।
कच्चित्सुकुशलं राज्ञो भयं वा नेह किं चन ॥ ५७ ॥

अथ वा ध्रुवमन्येभ्यो भयं परमुपस्थितम् ।
यदर्थमेव त्वरितैर्भवद्भिः प्रतिबोधितः ॥ ५८ ॥

अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम् ।
पातयिष्ये महेन्द्रं वा शातयिष्ये तथानलम् ॥ ५९ ॥

न ह्यल्पकारणे सुप्तं बोधयिष्यति मां भृशम् ।
तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम् ॥ ६० ॥

एवं ब्रुवाणं संरब्धं कुम्भकर्णमरिन्दमम् ।
यूपाक्षः सचिवो राज्ञः कृताञ्जलिरुवाच ह ॥ ६१ ॥

न नो देवकृतं किं चिद्भयमस्ति कदा चन ।
न दैत्यदानवेभ्यो वा भयमस्ति हि तादृशम् ।
यादृशं मानुषं राजन्भयमस्मानुपस्थितम् ॥ ६२ ॥

वानरैः पर्वताकारैर्लङ्केयं परिवारिता ।
सीताहरणसन्तप्ताद्रामान्नस्तुमुलं भयम् ॥ ६३ ॥

एकेन वानरेणेयं पूर्वं दग्धा महापुरी ।
कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः ॥ ६४ ॥

स्वयं रक्षोऽधिपश्चापि पौलस्त्यो देवकण्टकः ।
मृतेति संयुगे मुक्तारामेणादित्यतेजसा ॥ ६५ ॥

यन्न देवैः कृतो राजा नापि दैत्यैर्न दानवैः ।
कृतः स इह रामेण विमुक्तः प्राणसंशयात् ॥ ६६ ॥

स यूपाक्षवचः श्रुत्वा भ्रातुर्युधि पराजयम् ।
कुम्भकर्णो विवृत्ताक्षो यूपाक्षमिदमब्रवीत् ॥ ६७ ॥

सर्वमद्यैव यूपाक्ष हरिसैन्यं सलक्ष्मणम् ।
राघवं च रणे हत्वा पश्चाद्द्रक्ष्यामि रावणम् ॥ ६८ ॥

राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः ।
रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणितम् ॥ ६९ ॥

तत्तस्य वाक्यं ब्रुवतो निशम्य
सगर्वितं रोषविवृद्धदोषम् ।
महोदरो नैरृतयोधमुख्यः
कृताञ्जलिर्वाक्यमिदं बभाषे ॥ ७० ॥

रावणस्य वचः श्रुत्वा गुणदोषु विमृश्य च ।
पश्चादपि महाबाहो शत्रून्युधि विजेष्यसि ॥ ७१ ॥

महोदरवचः श्रुत्वा राक्षसैः परिवारितः ।
कुम्भकर्णो महातेजाः सम्प्रतस्थे महाबलः ॥ ७२ ॥

तं समुत्थाप्य भीमाक्षं भीमरूपपराक्रमम् ।
राक्षसास्त्वरिता जग्मुर्दशग्रीवनिवेशनम् ॥ ७३ ॥

ततो गत्वा दशग्रीवमासीनं परमासने ।
ऊचुर्बद्धाञ्जलिपुटाः सर्व एव निशाचराः ॥ ७४ ॥

प्रबुद्धः कुम्भकर्णोऽसौ भ्राता ते राक्षसर्षभ ।
कथं तत्रैव निर्यातु द्रक्ष्यसे तमिहागतम् ॥ ७५ ॥

रावणस्त्वब्रवीद्धृष्टो यथान्यायं च पूजितम् ।
द्रष्टुमेनमिहेच्छामि यथान्यायं च पूजितम् ॥ ७६ ॥

तथेत्युक्त्वा तु ते सर्वे पुनरागम्य राक्षसाः ।
कुम्भकर्णमिदं वाक्यमूचू रावणचोदिताः ॥ ७७ ॥

द्रष्टुं त्वां काङ्क्षते राजा सर्वराक्षसपुङ्गवः ।
गमने क्रियतां बुद्धिर्भ्रातरं सम्प्रहर्षय ॥ ७८ ॥

कुम्भकर्णस्तु दुर्धर्षो भ्रातुराज्ञाय शासनम् ।
तथेत्युक्त्वा महावीर्यः शयनादुत्पपात ह ॥ ७९ ॥

प्रक्षाल्य वदनं हृष्टः स्नातः परमभूषितः ।
पिपासुस्त्वरयामास पानं बलसमीरणम् ॥ ८० ॥

ततस्ते त्वरितास्तस्य राज्षसा रावणाज्ञया ।
मद्यं भक्ष्यांश्च विविधान्क्षिप्रमेवोपहारयन् ॥ ८१ ॥

पीत्वा घटसहस्रं स गमनायोपचक्रमे ॥ ८२ ॥

ईषत्समुत्कटो मत्तस्तेजोबलसमन्वितः ।
कुम्भकर्णो बभौ हृष्टः कालान्तकयमोपमः ॥ ८३॥

भ्रातुः स भवनं गच्छन्रक्षोबलसमन्वितः ।
कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ८४॥

स राजमार्गं वपुषा प्रकाशयन्
सहस्ररश्मिर्धरणीमिवांशुभिः ।
जगाम तत्राञ्जलिमालया वृतः
शतक्रतुर्गेहमिव स्वयम्भुवः ॥ ८५॥

के चिच्छरण्यं शरणं स्म रामं
व्रजन्ति के चिद्व्यथिताः पतन्ति ।
के चिद्दिशः स्म व्यथिताः प्रयान्ति
के चिद्भयार्ता भुवि शेरते स्म ॥ ८६॥

तमद्रिशृङ्गप्रतिमं किरीटिनं
स्पृशन्तमादित्यमिवात्मतेजसा ।
वनौकसः प्रेक्ष्य विवृद्धमद्भुतं
भयार्दिता दुद्रुविरे ततस्ततः ॥ ८७॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com